श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ प्रक्षिप्तः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ प्रक्षिप्तः सर्गः ॥

## ब्रह्मण आदेशेनेन्द्रस्य निद्रया सह लङ्कायां प्रवेशस्तेन सीतायै दिव्यक्षीरस्य दानं तथा विसृष्टस्य तस्य ततो निवर्तनं च

प्रवेशितायां सीतायां लङ्कां प्रति पितामहः।
तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम्॥ 1 ॥

त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च।
लङ्कां प्रवेशिता सीता रावणेन दुरात्मना॥ 2 ॥

पतिव्रता महाभागा नित्यं चैव सुखैधिता।
अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम्॥ 3 ॥

राक्षसीभिः परिवृता भर्तृदर्शनलालसा।
निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः॥ 4 ॥

कथं ज्ञास्यति तां रामस्तत्रस्थां तामनिन्दिताम्।
दुःखं सञ्चिन्तयन्ती सा बहुशः परिदुर्लभा॥ 5 ॥

प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम्।
स भूयः संशयो जातः सीतायाः प्राणसङ्क्षये॥ 6 ॥

स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम्।
प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम्॥ 7 ॥

एवमुक्तोऽथ देवेन्द्रः पुरीं रावणपालिताम्।
आगच्छन्निद्रया सार्धं भगवान् पाकशासनः॥ 8 ॥

निद्रां चोवाच गच्छ त्वं राक्षसान् सम्प्रमोहय।
सा तथोक्ता मघवता देवी परमहर्षिता॥ 9 ॥

देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान्।
एतस्मिन्नन्तरे देवः सहस्राक्षः शचीपतिः॥ 10 ॥

आससाद वनस्थां तां वचनं चेदमब्रवीत्।
देवराजोऽस्मि भद्रं ते इह चास्मि शुचिस्मिते॥ 11 ॥

अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः।
साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे॥ 12 ॥

मत्प्रसादात् समुद्रं स तरिष्यति बलैः सह।
मयैवेह च राक्षस्यो मायया मोहिताः शुभे॥ 13 ॥

तस्मादन्नमिदं सीते हविष्यान्नमहं स्वयम्।
स त्वां सङ्गृह्य वैदेहि आगतः सह निद्रया॥ 14 ॥

एतदत्स्यसि मद्धस्तान्न त्वां बाधिष्यते शुभे।
क्षुधा तृषा च रम्भोरु वर्षाणामयुतैरपि॥ 15 ॥

एवमुक्ता तु देवेन्द्रमुवाच परिशङ्किता।
कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम्॥ 16 ॥

देवलिङ्गानि दृष्टानि रामलक्ष्मणसन्निधौ।
तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम्॥ 17 ॥

सीताया वचनं श्रुत्वा तथा चक्रे शचीपतिः।
पृथिवीं नास्पृशत् पद्भ्यामनिमेषेक्षणानि च॥ 18 ॥

अरजोऽम्बरधारी च नम्लानकुसुमस्तथा।
तं ज्ञात्वा लक्षणैः सीता वासवं परिहर्षिता॥ 19 ॥

उवाच वाक्यं रुदती भगवन् राघवं प्रति।
सह भ्रात्रा महाबाहुर्दिष्ट्या मे श्रुतिमागतः॥ 20 ॥

यथा मे श्वशुरो राजा यथा च मिथिलाधिपः।
तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया॥ 21 ॥

तवाज्ञया च देवेन्द्र पयोभूतमिदं हविः।
अशिष्यामि त्वया दत्तं रघूणां कुलवर्धनम्॥ 22 ॥

इन्द्रहस्ताद् गृहीत्वा तत् पायसं सा शुचिस्मिता।
न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली॥ 23 ॥

यदि जीवति मे भर्ता सह भ्रात्रा महाबलः।
इदमस्तु तयोर्भक्त्या तदाश्नात् पायसं स्वयम्॥ 24 ॥

इतीव तत् प्राश्य हविर्वरानना
    जहौ क्षुधादुःखसमुद्भवं च तम्।
इन्द्रात् प्रवृत्तिमुपलभ्य जानकी
    काकुत्स्थयोः प्रीतमना बभूव॥ 25 ॥

स चापि शक्रस्त्रिदिवालयं तदा
    प्रीतो ययौ राघवकार्यसिद्धये।
आमन्त्र्य सीतां स ततो महात्मा
    जगाम निद्रासहितः स्वमालयम्॥ 26 ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे प्रक्षिप्तः सर्गः॥